श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्) अनुगृहीता

# ॥ श्री दोम्बविल्लि श्रीनिवासपञ्चश्लोकी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री दोम्बविल्लि श्रीनिवासपञ्चश्लोकी ॥

श्रीमद्वेङ्कटनाथदेशिकशिरोरत्नप्रभोत्त्युल्लसत् -
    लक्ष्म्या वेङ्कटशैलराड्दयितया जुष्टो दयारूपया।
बोम्बाय्पत्तनभागधेयमहितश्रीदोम्बविल्यां पुरि
    श्रीवासोऽभिनवालये विजयते दाताऽऽश्रितेभ्यः श्रियः ॥ 1 ॥

लोकाः पादारविन्दद्वयमिह नमतानन्दताऽविन्दतेष्टम्
    श्रीशः तिष्ठन् समस्तप्रणतवशकरं त्वेतदेवेति हस्तात्।
संसाराम्भोधिसन्तारणं अतिसुलभं नात्यगाधस्त्वियानि -
    त्यन्यं विन्यस्त हस्तं कटितट उरुगायोऽनुगृह्णाति भक्तान् ॥ 2 ॥

त्यक्त्वानन्दं पदं तत् परममिह समायादसौ श्रीनिवासः
    ब्रह्माण्डे वेङ्कटाद्रौ सुकृतिपरिचिते सर्वसम्पत्समृद्धे।
पुण्यक्षेत्रैककेन्द्रे चिरतरमथ सर्वत्र शक्तिप्रदानात्
    मूर्तीराविश्य सर्वप्रद इह लसतात् सर्वदाऽऽसूर्यचन्द्रम् ॥ 3 ॥

श्रीशैले श्रीनिवासः परमकरुणया नित्यवासाभिलाषी
    नानादेशीयभक्तैः उपचितसुकृतैः सेवितोऽभीष्टदायी।
प्रेन्धां कालक्रमात् यः समुचितनगरे तत्र तत्र स्वशक्त्या
    प्रादुर्भूयाऽखिलेभ्यो दददतुलफलं भ्राजते स्वेन भूम्ना ॥ 4 ॥

श्रीमद्वेदान्तरामानुज गुरुवरनिर्मापिते मन्दिरेऽस्मिन्
    स्थेयान् श्रीशैलवासी विलसतु सकलाभीष्टदः श्रीनिवासः।
आचन्द्रार्कं श्रितेभ्यः शुभगुणमहिताः सन्तु दीर्घायुषः ते
    श्रीमत्यां दोम्बविल्यां शुभततिरनुयात्वन्वहं क्षेमदात्री ॥ 5 ॥

स्तुतिरियमनवद्या पञ्चपद्या फलाप्त्यै
जयतु विबुधनुत्या सर्वदा सर्वदेशे।
गुरुवरपदपद्मासेविगोपालगीता
पठत सुमनसेमां सर्वदा सिद्धिदाः स्युः॥ 6॥

॥ इति श्री दोम्बविल्लि श्रीनिवासपञ्चश्लोकी समाप्ता॥